ते। सर्वस्यैव गणौघौ तु तज्जन्मः संजनमोपरः॥ तेन क्षेत्रे तु संस्थाना लोकसंजनमावि
जमैः। योऽयन्ति नराणां विन्नं विघ्नभूता हि क्षेत्रगाः॥ विनायकोपसर्गाश्च दश
दोषास्तथापरा। पर्वते चैव रक्षन्ति अविमुक्तं च ये गताः॥ वापीजले कृता संध्या
पका चैव सकृत् सकृत्। द्वादशाब्दफलं तत्र भवते नात्र संशयः॥ दापुयाणि ७०
तु येन क्वा द्रक्ष्यन्ति तु नरोत्तमाः॥ न तेषां विघ्नजं किंचिद विमुक्ते न विद्यति
॥ ॥इति मत्स्यपुराणे भैरवप्रादुर्भावे वाराणसीमाहात्म्यं॥ ॥सनत्कुमार
उवाच॥ इति पाराशर्य्यमया गेनादेवान्निता समुत्पत्तिः सिद्धक्षेत्राणां खलु

नन्दिकथासंश्रयेणाहं भगवति भवस्पर्शेषु चरितमासीद्गिरिसुतासमेतस्य वीरक
विरहविनोदहेतो भ्रमता बहुकालं क्षेत्रेषु येष्वतेरेवपूर्वत्वे कल्पनाकृता। देवैः
सेव्यते देवाः सन्निधाने भजन्ति हि। अथ कल्पे पुरावृत्ते मन्वन्तरसुखेपरे। अ
राजके मही पृष्ठं ब्रह्मा चिन्तापरो भवत्। न मनुष्यैर्विना देवाः समर्था लोकधारणे।
यज्ञेज्यानियमैर्दैवा लभन्ते पुष्टिमुत्तमां। योग्यो राजा प्रजापालने कोवेद्धर्मवत्से
लः॥ सोपश्यदथ राजर्षिं मनुवंशे रिपुंजयं। पृथ्व्यां सर्वगुणाकीर्णं धर्मनिष्ठं म
हाव्रतं॥ तमुवाचाथ देवेशो ब्रह्मा लोकपितामहः॥ ॥ब्रह्मोवाच॥ रिपुंजय नि

वाक्येदं वचनं मम पुत्रक॥ श्रुत्वा त्वपावनं वत्स निर्विकल्पेन चेतसा। अनंतं ते तप
सा तात कृच्छ्रेनानेन संप्राप्तं॥ धर्मेण विजिताः सर्वे त्वया लोका नरोत्तम। किं यता
मधुना लोकपालनं कृत्वया नत्व॥ उपकारफलं देव त्वादृशस्य तु देहिनः। न
धर्मस्तादृशो न्योस्ति न चान्यो र्यस्य साधकः॥ यदा परोपकारो हि महत्वस्य प्रसा ७२
धकः। निर्दयासि रपिस्त्रैषा परोपकरणे नवै॥ अपकारेण भूतानामपि त्रिभुवने
श्वराः। सर्वान नलोककार्याय मदर्थं गौरवेण च॥ पृथ्वीं समुद्ररसनां प्रजाश्चैव
प्रयात्यय। इत्युक्तः स तु राजर्षिः सदा पद्मभुवा स्वयं॥ सो वाक्प्रांजलि भूत्वा:

ब्रह्माणं तु रिपुंजयः॥ ॥राजोवाच॥ स्वभावेनाचला पृथ्वी त्वया पूर्वं विनिर्मिता।
विनैवं पालकं ह्येषा कुत्र यास्यति मेदिनी। स्वल्पवीर्य्य समुत्साहाः प्रायाः स्वल्पायुषा
नुविशा॥ स्वल्पप्रज्ञाः स्वल्पधनाः प्रायो दुःख समाश्रयाः। दैवैर निहताः प्रास्ता न
वृत्तिर्बहु वर्षिकात्र। एवंविधा प्रजां द्रष्टुं न शक्नोम्यमित द्युत। अशक्तो दुःखिता द्यस्या
नार्य्य वित्तो विपद्यते॥ मर्य्यादा मनु शस्त्रेषु यदिमे नाकवासिनः। आदत्ते चेमम स्थाने
नवासं ते भुवेद्भवेत॥ ॥ब्रह्मोवाच॥ न विषण्णं त्वेवमेवैतद्यत्त्वयोक्तं नृपोत्तम। प्रथा
नादे वता सा तमेगा रववसेनतु। मर्य्यादान्ते न नस्यंति निदानं स्वं विनातव। किंक
र्म्मौ भूतयते पृथ्वीपालं दुष्याम्यहं ततः। एवमुक्तस्ततो ब्रह्मा वाद्दमुक्त्वा ऊम सनुः॥ २

रास्ते न विष्यन्ति परिशेषदिवौकसः। देवास्ते दासभावेन करिष्यंत्यग्निसन्निधौ। दे
वोदासेति ते नाम नविष्यत्यति सुव्रत। इत्युक्त्वान्तर्दधे ब्रह्मा सरथस्य दमः प्रभुः॥
अथ राजा प्रतिज्ञाय ब्रह्मणो भूमिपालनं। पृथ्व्यामुद्घोषयामास सर्वेषां त्रिदिवौक
सां। नवती विहितः सिद्धो मनुजानां च भूतले। येयत्र कंदने तोये स्थले वा भूधरेत ७२
था॥ स्थितिर्याति ह्यसुरा मनुजानामिषेधरा। तच्छ्रुत्वा ह्योषितं तस्या राज्ञो भयनिपी
डितः॥ प्रधाना ब्रह्मणो वाक्या गौरवात्तु दिवं गतः॥ अथ प्रजास नृपा तेर्द्धर्मेण वर्द्ध
यस्तदा॥ पुत्रवत्स्नेहसुखो न हृदये नाति निर्वृतः। प्रजास्ताः सुखसंवृद्धा जरा

मृत्युविवर्जिताः। पुत्रिगोधनधान्याद्याः सर्वकामसमन्विताः। यौवनस्थाश्च सत
तं निर्द्वन्द्वधर्मसंश्रयाः। नासीनां पृथिव्यां शैलश्च स्थलो वा द्वीपपर्वतं। यो न नाम
जनपदो मोऽनुवश्चिमधनौघवान्। अकृष्टपच्या पृथिवी स्वादुवद्भिः फलैर्युताः। दे
वलेन तृप्ता सा द्वः सर्वकामगुणोज्वलाः। एवं व्रजति काले तु ततो नियुतसंख्यया। त
तोऽनर्थपरा देवा विप्रकारार्थमुद्यताः। तेषां कुर्वन्त्याजलेन प्रजा दुःखान्यनेकशः।
अथायान्द्वविधाकरो त्सुदीर्घपाकशाशनः। तयानस्योभू [gap] त्सर्वतः पृथिवीत
लात्॥ न यज्ञान्यनुवर्त्तन्ते न चर्षं क्रिमवर्जिता। लोकश्च व्याधिसंदुःखस्तदा भूद्विष

संस्थितः॥ ततः स राजा र्तं दृष्ट्वा त्वनवद्यवाहनः॥ सो वारयच्च ताः सर्वाः सर्वा
श्च त्रिदिवौकसः॥ दिवोदासं प्रति नृपं गाथेयं मुनिभिः कृता॥ पुराणेर्द्धर्मयुक्ते
स्य सुखतस्य देवतः॥ राज्ञा तत्र दिवोदासो कृत्वा यूयां दिक्षु सां॥ तं सर्वाम्पालय
ति च प्रतिषेधति वारयति च नानाविधानानयति॥ एवं गच्छति काले तु स गणस्तु महे ७२
श्वरः॥ स्वपुरं चिन्तयामास सो विमुक्तं पुरधिपः॥ वाराणसीं विना देवो नरतिं प्राप्
कुत्रचित्॥ राज्ञो धर्मकर्मणि स्थस्य न वाक्रमणमिच्छति॥ ब्रह्मणो तिन्तथोवाच न च कर्तुं
स्वच्छति॥ एवं चिन्तापरो देवो नरतिं प्राप कुत्रचित्॥ सर्वदेवः सर्वलोकेषु यदा नर

७२
तिमाप्तवान्॥ तदा गणेशं देवेशः क्षेमकं नाम नामतः॥ उवाच वाच्यं यत्रादावन्तो र्थो
पिकार्यवान्॥ ॥महादेव उवाच॥ गच्छ पुत्र मया जप्तः प्रज्ञाये च नृपोत्तमं॥ उपा
येन पुरं तस्मान्निर्वासाय गणेश्वर॥ तस्मिन्पुर पते नित्यं रतिं मे धावते मनः॥ इत्युक्त्वा
प्रसमोवाच ते र्थं त्युक्ष्वा कृताञ्जलिः॥ श्रीगन्तमातुर्मं लोके प्रच्चाजा हर्षिता मनः॥ दुर्ल
भा हि प्रसन्नस्य प्रभोराज्ञा सुरीरिभिः॥ तस्मिन्पुयातु गणो शंकरं तोषमागमत्॥ युक्ति
ज्ञो निवृत्तो वत्सः प्रनोर्न्न त्योपि दुर्लभः॥ स्वरूपं स तु संत्यज्य वाराणस्यां गणाधिपः॥
ततः स भिक्षुरूपेण वृद्धौषधिपरियहः॥ नानाव्रतकलावार्द्धं सं सिल्पकलो युतः॥

रहीत्वा दुंदुभिं स्कंधे वादयंत्यति सत्वरं ॥ दुंदंभिनासरता द्वारे वाद्येन नगरवेश्मसु ॥
ज्वरन्नूतविषाद्भीता नानादोषव्यपाश्रयः ॥ कस्य को व्याधिरत्युग्रो यद्दृष्टं च सम
नये। को पुत्रः पुत्रवानस्तु मनमत्र च माश्रितः ॥ वैद्यो स्मि स र्वयुक्तिज्ञ सत्यव ७४
णा चिकित्सकः ॥ तच्छ्रुत्वा वचनं तत्र कौतूहलसमन्वितः ॥ सरद्द्भ्वालनारी कोऽ
नेसाम मञ्जिऊम्मिवान्। तस्मिन्निवेदयामास सं निधानव्यपाश्रयं ॥ व्याधिना व्या
धिमात्मीयं विस्फोशुममितोप्तुजं। तेषां समाश्रयामास व्याधिं वर्ज्जयमन्यथि ॥ दि
नैर्दिनैर्महाभागः प्रसन्नस्तनूक्षणेन च। तेन तस्मिन्मतिं कृत्वा पूजां चक्रुः प्रह

र्षिताः। हेमरत्नाम्बरधरैर्द्दन्यथा सुरादिभिः ॥ एवं सत्यवचस्तत्र वर्षाणि तु चतुर्द्द
श। नृपतेरन्तरप्रेक्षी नवानन्तरमथाप सः ॥ प्रजो राज्ञश्चिरयतस्तस्य चिन्तेयमाविसन्नृ
। अहो हृदुः सद्धो वा ज्ञा अहो धर्मव्यपाश्रय ॥ अर्हतेओ निधिञ्चावि दुर्जयश्चा व्ययी
वरो ॥ किं मयातः परं कार्यं कामंप्रज्ञविजृंभितः ॥ असमाप्य प्रजो राज्ञां न्त्यः को द्र
र्शनं वज्रेत्। लोकापवादभीतो वा विस्मृष्ट पुरुषवतः ॥ संभावनामयि विज्ञो सर्वैव्यर्थप
यास्यति। ततस्तस्य प्रजो मूर्त्ति विस्मदत्तेपि वा ॥ एवं सं चिन्तयं स्तत्र भिक्षुरूपी गणा
धिपः ॥ जीर्णोद्यानं नता आत्तेग्रहे नैसंवृतः स्थितः ॥ तत्रान्तरेण पतेस्तस्य संतिष्ठतस्य

तु॥ महिषी निर्ज्जरा नाम प्राणेभ्योपि गरीयसी। रूपेण प्रतिमा लोके सा च पुत्रा सुतार्थि
नी॥ देवी तु वहुला देवी श्रुत्वा तन्निमन्त्रं सुतं। सर्व्वकामप्रदं प्रायो नागराणां सकौतु
का॥ स्वां सखीं प्रेषयामास सुनन्दा नाम नाविनीं। भिक्षुमानय से गुप्तमन्तःपुर म
न्दिरे॥ सतया सापि तो भिक्षुर्विचिंत्य नगरं तदा। मातमासाद्य गहने जीर्णोद्यानन ७५
ताकुले॥ उवाच चिंतापरमं भिक्षुं शिष्याः समन्विताः। प्रणम्य प्राञ्जलिर्भूत्वा कार्य्या
र्थं सुगतव्यथा॥ भगवन्महिषी राज्ञः प्राणेभ्योपि गरीयसी। वंध्या पुत्रार्थिनी देवी उपेत्यां
द्रष्टुमिच्छति॥ भवान्दयापरः प्रायः प्रजानामीहितप्रदः॥ एवं श्रुत्वा गणपतिर्लब्ध

वक्रश्चकारणे। हृदयेन विचार्य्याथ भिक्षुरात्मन्यचिन्तयत्॥ नारीभिरखरश्चाणि
प्राप्यन्ते सुस्थिराण्यपि। नारीभिर्लब्धचित्तस्य पुरुषस्यातिमात्रकः॥ पराभवप व
तिविच सम्येत नीषेणाः॥ स्त्रीभिररक्षितचित्तस्य सुलब्धोपि महोदयः॥ स्त्रिय एव वि
नाशाय पूर्व्वेषाममरद्विषां। स्त्रिय एव हि देवानामिन्द्रादीनां श्रियाश्रयाः॥ स्त्रीभिरा
रब्धमतसः कुतः पुंसो मनस्विता॥ कृतश्चापि सुचभिता स्त्रीगोचरगतस्य वा॥ एषो
क्लेभ्यो नृपवरस्त्रिदशैरपि दुर्ज्जयः॥ विनाशमेष्यति क्षिप्रं स्त्रीणां गोचरमागतः
।इति संचिंत्य हृदये राज्य ॥ ॥भिक्षुरुवाच॥ नद्रेणोयं तव मति विप

तपस्वापिनी॥रथ्यानार्थेवगतिर्व्वोधाआर्शंकाजननीमिमां।अविज्ञातोनरपतेर्गृह
मध्येहिनाप्रसेत्॥आज्ञावन्तःपुरेद्रष्टःसाहसीपुरुषोनवेत्।नतिष्ठेत्स्त्रीकथांकु
र्व्वन् रेषकृथा॥नचान्तःपुरनारीभिःपरिचारिकयासह।नचापिराज
शिशुभिःसहक्रीडासमाचरेत्॥नान्तःपुरपथेतिष्ठेन्नवाक्षानावलोकयेत् ७६
।नत्स्त्रैतिनहसेत्तउद्वेद्वावेतुनोनरः॥वृद्धवान्नचगच्छेच्चनृपान्तःपुरगोच
रः॥नविरोद्ध्याचनाज्ञानेरिावक्रकुलसंयुतः॥मधुरासर्व्वदानापेक्षुत्वावक्त्रा
श्चधारयेत्।नियमैकतमेयुक्तःश्रुतेकर्म्मणियानिशं॥अतःकृत्स्नंचसर्व्वेषां

राजद्वारिनिषेविनां।संधिविग्रहयुक्तिज्ञोनरोराजकुलंव्रजेत्।अधर्म्मेवर्त्ततियत्सुपु
रुषोनीतिवर्ज्जितः।सराज्ञोवध्यतामेतिनदेहुदपुमानिव॥विदित्वानीतिशास्त्रार्थंतद
र्थेचातिमुक्तिमान्।दक्षोक्षोन्यमनाविद्वान्नरःकुशलवान्भवेत्॥एवमत्वाप्रजाःक्षि
प्रंत्वमेवान्तःपुरंशुभे।नाहंतत्रगमिष्यामियावन्ननृपतेर्व्वचः॥ममस्याप्यार्थनास्तुकौ
करणेस्मिन्शुचिस्मिते।साचतस्यवचःश्रुत्वाभिक्षोःक्षुभितमानसा॥जगामान्तः
पुरंतूर्णंदेव्यातिश्चान्यवेदयत्।सखीवचःसाश्रुत्वादेवीदीनाजगावचतां॥शृणुनन्देक
उपायोत्रराजायेनप्रवर्त्तते।भिक्षोरानयतेक्षिप्रंयावन्नासौव्रजेत्क्वचित्॥जगावचसा

तामुक्तो एवं सुनन्दा युक्तभाषिणी॥ ॥सुनन्दोवाच॥ त्वं तस्य वल्लभा राज्ञस्तदर्थं
सर्वं करिष्यसि। तथापथ्यस्य चिन्ता राजानं संप्रदर्शय॥ आहारमिच्छं सुमना सो
प्रयुक्तं महात्मना। ततो विपर्ययामास सद्वास्थ देव्याः समीपके॥ विनीते वेशस्या प्रस्तु
गता सान्तःपुरं तदा। सप्रणम्याब्रवीद्देवी द्वास्थं द्वारमिदं वचः॥ ॥द्वास्थ उवाच॥ ७८
आपराह्निसुखो देवो मृगयाधिकृतक्लमः। देवी प्रतीक्षमानस्तु द्रुतमागम्यतामन
ः। सा तस्य वचनं श्रुत्वा द्वास्थस्योवाच सस्मितं। आहारेणानमे तेर्पितं च मे जीविते
न वा। प्रपर्याप्तं सर्वं संगास्मि ब्रूज पश्चात् करिष्यसि। सगत्वा तद्वचो राज्ञे द्वास्थः स

र्वं न्यवेदयेत्॥ राजा तु तद्वचः श्रुत्वा देव्या द्वास्थमुखार्पितं॥ न तस्थे विस्मयाविष्ट
स्तस्मादाहारमनुपातू॥ तमूचुर्मन्त्रिणः स्वापाः परावरदृशो हिताः॥ परस्परमुखाव
लोकमितलोचनपद्मदाः॥ ॥मन्त्रिण ऊचुः॥ राजन् सर्वावस्थिवस्थासु सपादान्न विनं
ह्वयेत्। त्वं चाविबुधिरिनाद्वोन्यद्वोन्यशंकास्पदो भवेत्॥ शरीरो मंगलाधारो विशेषे
णात्र भूभृतां। रक्षितु ओंचि भवेन्नाथ स्वं रीरमहाधनः॥ शरीरस्य च सर्वस्वं माहार
मेमृतं किल। आहारो भिमुखस्तस्मा त्वमेवं वर्त्तसे नृप॥ कल्याणैर्यायते देही पुरु
षत्वे महागुणः। तत्रानन्तिगुणोत्कर्षात् शूद्रत्वे जायते नरः॥ तत्रापि अतिगुणोत्कर्षा

श ३

द्वैश्यराजन्यविप्रतान्।तत्राप्यतितरैर्द्धर्म्मैः स्वजातौ तु विशेषवान्॥सद्भावाश्चनसे
वेत नाशीलं च वदेत्क्वचित्।नहीनं कर्म्म कुर्व्वीत नहीनैर्म्मन्त्रमाचरेत्॥योजयेत्स
ज्जनैः संगं योजयेत्कर्म्मणा विधिं।शोषयेत्क्षुद्रतुल्यस्तु शिष्टाचीर्णं न लंघयेत्॥रि
पुणा वो धुर्वां पंच क्षित्वा शत्रुगणो स्ततः। उग्रीषेन्मतिमत्वं च व्यसनांश्च परित्य ७८
जेत्।मंगलाभिमुखं कृत्यं पुनरेति न कोपितः।सर्व्वमंगलकूटस्त्वं देहि मां मग
लाश्रयः।माविर्लंजयमर्य्यादा युद्धदित्वं जगत्प्रभुः। इत्युक्तो मन्त्रिभी राजा तानु
वाच नृपोत्तमः।विनाश गौरवाद्देव प्रियया चापवादिनैः।ज्वाव्चकालसमपन्नं

वाक्यं वा क्व विशारदः॥ ॥राजोवाच॥गतिर्हि कर्म्मणां चित्रा पुरुषोत्र नरेश्वरः।
फलं संचयमश्नाति निवशः पुरुषः किल।अन्यच्च तमनादिष्टं स्वाहंकारकदर्थि
तः॥कदाचिन्मंगलाचारो दुःखमाप्नोति मानवः।आचाररहितोप्यत्र मनोभीष्टा
र्थवान्भवेत्॥पर्वं त्वनियमं लोके न विष्ठो नास्ति निश्चयः।अतः सांप्रतिकं कार्यं
मुख्याश्रितमिहाश्रयेत्॥न चोर्थं वहु मन्येहं प्रियादर्शनवर्जितः।अतः प्रयामि
तद्दिदृक्षुः प्राणेभ्योपि गरीयसीं॥ मंत्रिणास्त्वेवमुक्तास्तु राजानं पुनरब्रुवन्॥ ॥
मंत्रिण ऊचुः॥ राजन्यास्हि मंगलं ते स्तु रक्षास्तु त्वां दिवौकसः।निमित्तेन तवाने

नरूपेणानचनरोत्तमश्च॥ इतःसंवत्सरे पूर्वे सकामोराज्ञविजमं।एवंमत्वात्वया
नार्व्यकृतयत्नेनसर्वदा॥इत्युक्तःस विवेराजाजगामान्तःपुरंराज्ञो ततः।तत्रा
पश्यन्नृप्रियांदीनांनचवेत्यत्रकारणं॥तामपृच्छत्ततोराजास्नेहार्द्रीकृतमानसः ७८
॥ ॥राजोवाच॥येनापराधमीदृक्मे तस्यरूपन्नदृश्यते।करोतिसर्वकामानयिः
संसारसमुद्भवः॥नियमंतस्य नैवास्ति नचकालपरिग्रहः।तेनेहदेवदेवेन पी
डितात्वचलितारते॥त्वंराजासर्वलोकस्य देवतैरपिकांक्षितः।राज्यंतेनचतेषांवै
सख्यमिच्छन्त्यसे॥तवसूरतरालोके त्वयिधर्मःसनातनः।त्वयिसौख्यंचसंमृद्धिं

र्त्वयिचैवाश्रयन्तता।तववाञ्छांप्रियाजायातिनसेसर्वमिवर्तं॥वल्लेराज्येसुखीकिंवि
द्मसुधांवसुधाधिप।नमेस्तिनिर्वृतिंतत्र क्षीणासायत्रतिष्ठति॥अपुत्रनृपतेराज्ञान्दर्वी
थानूतयेत्तुवि।वयंदेवस्ययोगेनदुराराध्यस्यमायिनः॥कस्येतानिसमृद्धानि
किमिदंदेवितेरूपंविलीनमपिजायसे॥मग्नासिकेनदुःखेनकस्यापिकृतमीदृशं का
वापराधंसन्नृपस्यमृत्युकालमुपस्थितः॥देवोवादानवोवापिराक्षसानागोपिवापुनः।
एवंतुवदनस्तस्य श्रुत्वाभाषितमीदृशं॥नृपतेस्तुवचीदेवीनाचेदंनेदीवर्णया॥ ॥
निर्ऋरुवाच॥ राज्यानिचपुराणिच।अस्मात्सरांउनेलोकेजाति

पुविलयेतदा।पुन्नाम्नो नरको द्वारा त्रे न्यस्त्राता हि पुत्रकः॥समृद्धं च जगत्कृत्स्नं र
हो पि पितन्नु समः।सुखोपि दुःखसर्गोयं … प्यवसादकः॥क्रीडनं पीडनायै
व तेषां ये पुत्रवर्जिताः।अपुत्रा जगतो दीना दुःखिता पुत्रवर्जिताः॥अपुत्रेच गति
र्नास्ति स नापुत्रविवर्जिताः।सुखिनस्ते नरा लोके ये बालैर्पाश्रु धुंठितं॥परिषदउं ८०
तिस्वस्तुतं अस्फुयाक्षर साधकं।कंठवर्णाय यदा स्पष्ट वस्त्र नामो कि सुन्दरं॥सुखं ये
स्वस्य बालस्य पश्यंति सुखिनो हि ते।अपुत्रिणो वयं राजन् सुखिनो हम नुत्तमं॥
अनेन कारणेनास्मि निर्वेदं परमं गताः।स्मृत्वैवं भाषितं रम्या प्रियायाः प्रियवी

पतिः।प्रत्युवाच स्वामिन प्राज्ञः कार्य्यं युक्ति विचारयन्॥ ॥राजोवाच॥अशक्यप्रायमर्थं
अप्रार्थ्य सि स्त्री स्वभावतः।भाविता र्थो भवन्ती ह जन्तवे नाहितस्ततः।न भावी पश्यते ह्यर्थो
न भावी भवते क्वचित्।यथा नादिरयं जन्म जायन्ते षु प्रवर्त्तते॥तस्यापी श्वामियोगेन गहनो
दुर्विचारणः।जन्मैव श्वामियोगेन भावाभावो हि देहिनां॥अनतिक्रम्य धर्म्माणि प्राप्यंते दिव
सेरिह।न बुद्ध्या न च शौर्येन विपुलेन धनेन वा॥शक्यं ते तु व्यतिक्रांत भायाचैवं स नातनीं।
भावाभावौ यदा स्यातां लोकस्मिन् व्यभिचारिणौ॥सर्वे स्युः सर्वधर्म्माणि सर्वे स्युः खेलाभि
नः।खंडदोषं समीक्ष्य हि सर्व्वं सत्तासि न भवेत्॥विषं चामृतमेवास्या दमृतं च विषी भवेत्।

वाद्यस्याग्रेऽन्तु धर्म्माणां स्थितानां दर्शयेत्ततः। ततो नमीपते नैते व्यभिचारस्वरूपिणः॥
नवापत्येन शीलाना मनीषा दृश्यते फलं। सुखैकस्य परित्यज्य दुःखं बहुमतं भवेत्। दृ
श्यते चान्ध बधिरा दरिद्राः कुष्ठिनो जडाः। यदि जन्तवता मि[illegible]ति फलं वाभिगतेगुणे। प
तद्रूपं जगत्रूपे न्निर्व्याधिन सुखाश्रमं। तस्मान्नियमितो धर्म्मो निर्विकारस्वरूपिणः। तिष्ठ ८२
तामवेशो केच महैश्वर्याः सुरास्वति। स्वशरीरनियोगस्य नित्यासौ खे वियोगिनः। यद्यु
पक्रममात्रास्ति तत्कथं नैर्न लभ्यते। तस्मादनादिरेवैष स्वभावः शाश्वतात्मकः। विशेष
तश्च दृश्यं ते जन्ममृत्युं नादयः। संसारस्य स्वभावत्वानुपायो दुर्ज्ञेय कर्मजाः। नकेवलं
उ१

च संस्कारैः प्राणिनां जन्म कथ्यते। शारीरिणां विहूनं तु कर्म निर्ज्जायते पुमान्। दंशो वा
मशको हस्ती देवो दैत्योऽथवा तकः। सुखदुःखप्रदो नूनं संतालो नायमेव वा। यदि दृष्टो
स्त्युपायस्ते योऽस्माभिर्विवर्जितः। इत्युक्ता महिषी राज्ञा तमुवाच जनाधिप। स्त्रियाः
स्वभावो दृष्टार्थी नगरे वा विचारतः॥ ॥निर्ज्जरा उवाच॥ राजन्विकल्पजालेन तवालं
वाग्विकर्पणाः। सत्यमन्त्रेषु पदार्थेषु लोकोऽयं संस्थितो यतः। नानुमानादिसिद्धस्य प्रत्य
क्षत्वं जनाधिपः। स्वनेत्रयुग दृष्टस्य प्रत्यक्षं विवक्षितं। तर्केण ये च नीयन्ते तेषु लो
को न संस्थितः। स्वयं यद्दृष्टवान् दृष्टं तो कस्मात्र समुच्चयमी॥ कर्द्दमे निहते वीजा सा

युक्तिर्नोपपद्यते । यायास्मिन्द्विफलीतस्माद्यदिदृष्टं न तद्भवेत् ॥ दृष्टं शीतातपस्पर्शं पदार्थै
यैरनेकशः । तेषामेवञ्जनो वेत्ति शक्तिरव्यभिचारिणी ॥ यन्नास्ति न तदस्तीह यदस्ति न
च तन्मृषा । मत्स्यान्तत्र वा नापि सत्यतां प्रतिपद्यते ॥ विकेत्यकनितेतर्के किंचिदेव न वि
द्यते । सत्तामयियदार्थानां स्वभावाच्युद्यमं विना ॥ तिलेतैलं स्वतो नास्ति छृतं दध्नो न १२
नादिव । दारुवादिभ्यो विना यत्नं न पौरुषसमाश्रयेत् ॥ इह भिक्षुः किलाजातो प्र :
सीचिन्तामणिः प्रभुः ॥ तस्य नव्याहता शक्तिः श्रूयते सर्वजन्तुषु ॥ लैं जन
विदं सरणीं तिस्थगच्छति ॥ दृष्टार्थ सर्वभावानां नियमे सात्र मे हेतुः ॥ तस्य भिक्षो :

प्रसादेन सुतवर्ती वयं नृपः । त्वद्विधाम्यो न संदेहः स्वधामनसिवर्त्तिनी ॥ श्रुत्वा स वचनं त
स्याः प्रियाया राजसत्तमः । चिंतयामास हृदये बहुदोषं प्रयोजनी ॥ न कनाहं न देवानां स
म्मतिकार्ययोगतः । कस्तेषामन्तरं वेत्तुं मनुष्यः शक्तिमान् भवेत् ॥ प्रकृत्या खतिनः स्त्रु
डा बहुदोषाश्च निश्चवः । मातुष्यपापरूपेण निश्चुः पर्यटते महीं ॥ कान्यथादर्शना दे
व सर्वार्थान्संप्रसादयेत् । ममेदं दयिता नार्थ्या साक्षात्तत्वार्थदर्शिनी ॥ स्त्री निःस्तुकस्य :
वाचित्रं प्रसन्नं न प्रकाश्यते । पुंसामनर्थभूतांश्च स्त्रियः संतमहे तवशः । तस्यामनन्त मेदो
मं त्वाहं न करोमि च । इति राजा तु हृदये संचिंत्य परमार्थवित् । प्रेषयामास त्वरितः

कार्यार्थिस्त्वं विचक्षणं । सद्यः स्वकुचिज्ञीर्णपुराद्यानेतमानयत् ॥ पूजयामास च नृपं
सौभिक्षुं विधिना ततः । पाणिना तु गृहीत्वा च ह्यासने चोपवेशयेत् ॥ आसनस्थं कथा
पूर्वमिदमूचुर्जनाधिपः । तं भिक्षुं दिव्यकर्माणं मतकर्मचमहोजसं ॥ ॥राजोवाच॥
अपुत्रोस्मि महाभाग वंशोयं मह्यविषीचमे । पुत्रजन्म विना चैषा प्राणान्मोक्तुं व्यवस्थिता ६३
॥यद्यत्रोपमोऽस्ति कश्चित्प्रापोस्मदादिभिः । न गवंश्चात्प्रसादेन वक्तुमर्हसि निर्वृतः
॥इत्युक्तो राजसिंहेन स भिक्षुरद्भुताकृतिः । उवाच स्मितपूर्णानि मुखो मधुरया गिरा ।
॥ ॥भिक्षुरुवाच॥ राजन्ननर्थका सृष्टिस्तस्य धातुः प्रजायते । लोकेषु दृश्यते सत्या:

मर्त्यास्तु प्रजायते । प्रकृतिर्विद्यते देवी अनाद्यंत महागुणाः ॥ तस्या योगेन पुरुषः स्व
स्थेतिप्रतिज्ञायते । नानाप्राणिषु यत्स्त्रीत्वं प्रकृतिः कथ्यते बुधैः ॥ पुंभिन्ना प्राणिनश्चैव
पुरुषः प्रतिज्ञायते । तयोः संयोगजा सृष्टिरस्याप्यज्ञ वर्जिताः ॥ स्त्रीणां चैव नास्ति वा
नित्यं सृष्टिपक्षे यत्नस्तु ताः । तथार्थेषु पुराणेषु नास्ति वन्ध्या किल स्त्रियः ॥ देहधातु
प्रकोपत्वात्पुरुषाणां प्रकोपतः । न तर्हि सा प्रकोपाच्च वन्ध्यत्वेता सुदृश्यते ॥ द्वासप्तति
सहस्राणि नाडीनां तु प्रकीर्तिता । देहे सूक्ष्मे महति वा प्रधानास्तत्र षोडश ॥ आहारस्तु
त्रिविधः सूक्ष्मश्चैव वा हि देहमाश्रिताः । त्रयस्तु धातवो देहे वातपित्तकफात्मिकाः ॥ आह्नु

नारिकानाम्नास्तु भेदास्तासामनेकशः । यदा प्रकुपिता नाड्यो मलधात्वन्तराश्रयात् ।
तदा स्वविषयेतासां व्यर्थन्नैं प्रतिपद्यते । भेषजस्तत्र चोद्धारः सम्यग्गोषधयोगतः ॥ धा
तुसंक्षोभसमनैरौषधैरस्तुपक्रमात् । तपतेप्रकृतिर्दृष्टैर्नाडीरन्ध्राणितानितु ॥ अथ
भूतोपसर्गेण निरुद्धं स्त्रीप्रजाफलं । निदानेरोदनासौ च दिवास्वप्नादिभिः शनैः ॥ ६४
तत्रापि कुशला सन्ति कर्त्तव्यमुत्तर्यत्ययत् । अस्याश्चापि महद्दिष्टास्तेपायो भूतोपसर्ग
जं ॥ दोषं वैद्यैश्चिकरिष्यामि तस्यास्य स्यान्नुपक्रमं । दुर्जयस्यास्य दोषस्य जयायज्ज य
तं विर ॥ विधास्ये देवतां विश्वं विचित्रास्तु परिक्रिया । आनीयतत्पिशाचे ष्किवृक्षस्त्वं

सुमनोरमं ॥ अपरिष्कृतमच्छिद्रमदावाग्निप्रनिर्ज्जितं । अमनुष्यकरस्पृष्टं पूर्वदिग्ग
जसाखिनं ॥ स्निग्धपल्लवसंपन्नं प्रभूतफलसंकुलं । एवंस्तुत्वातु नृपतिस्तत्र का रावि
वारितं ॥ भिक्षुश्च पाटयामास स्वयं तद्रूपमात्मनः । निवेदयामास वरं रोहिण्याभिक्षु
वासरे ॥ तं राजा पूजयामास वृद्धं सर्वैस्तु वस्तुभिः । वस्त्राभरणदानेश्च धूपामोदैः स
माहितः ॥ तस्मिन्निष्कृत कार्ये तु राज्ञि भिक्षुरुवा- रास्तु व्यवहितं कुरु स्वकिप स्था
दितात्मवान् ॥ ॥ भिक्षुरुवाच ॥ परं तेक्षेमकर्नाम तं विनिर्दिशतं । यद्दिप्रसादनेन ग
च्छेन्तत्सेकोमदोह्यहं ॥ जनान्यतातत्तो विद्वानस्य प्रभुविचेष्टितं । ततः प्रभृति तैं राजा ।

७२

सकलत्रो महामनाः। सर्वभावेन तं देवं जगाम शरणं मुदा॥ सापि भिक्षुर्गतजने नि

शि मूर्त्तिं स्वयं कृतां। तां प्रविश्य भिक्षुरूपं परित्यज्य स्वमायया॥ राज्ञाथ प्रकृतिर्वाग्मीज

नान्नगरवासिनः। ग्रामखेटकपुरेन्यश्च समाजग्मुश्च कारणे॥ वराहमेषमहिषैरजैः पा

नैर्विभूषणैः। उपवासविवेर्षाद्भिः सर्वार्थप्रसाधकैः॥ रोदनश्रद्धाप्रधानस्य गतस्य ८५

शरणं मनः। करोति कामसंपत्तिं नकस्यापि गतः सदा॥ यदा स न करोत्येवं तस्य कामप्र

पूरणं। अथान्तरीक्षात्सुश्राव वाक्यमेषस्वनं नृपः॥ ॥वागुवाच॥ अहमस्मि क्षेमकादे

वः सत्यं ते भिक्षुभाषितम्। यथा न विक्रीतो वेहि चित्ते यं कलुषापहं॥ यदा प्रसन्नसो दे

सदा ते कामिको भवेत्॥ नाहं प्रसादं पश्यामि भावेनानेन तेन्नृपः। समापितं मया चापि प्रो

क्तं प्रभु विचेष्टितं॥ यस्मान्मामर्च्चयित्वा तु स्थानं नास्ति तथा तव। तस्मात्तेन नगरं शून्यं सप्त

रात्राद्भविष्यति॥ भ्रमिष्यसि त्वं पृथिवीमनिकेतः सबान्धवः। देवा यथेष्टं स्थानेस्मिन् स्था

स्यते भूतले पुनः॥ क्षेमकास्त्वेवमुक्त्वा तु जगाम गिरिशान्तिकं। कृतस्मयो जनेरन्नैर्मुदं प

भुविलोकने॥ धार्ष्टता हृष्टता चापि चेतसोतिप्रजायते। स प्राप्य मंदरं शैलं देवदेवं ददर्श

ह॥ दृष्ट्वा भवन्तं देवदेवेशं कृतांजलिपुटो गुणा॥ ॥क्षेमक उवाच॥ देवाज्ञा खतसंतीश

विधिं मह्यं क्षेमकं गणं॥ त्वत्प्रसादेन कृतकृत्या भवन्तिहि॥ प्रभुप्रसादलब्धस्य

नृत्यस्यासार्थमस्तिनः। नृत्या नाऽगतो नूत्यै प्रभुसंभावनान्मतिः॥ श्रुत्वैवं वचनं
देवः स्निग्धमुद्वीक्षितं गणं। अस्मे महनिव्यतिक्रांते गत्वा [illegible] पुरीं॥ योगैश्व
र्येण भगवान्मूर्धकारापरमात्मनः। कांचनेन विशुद्धेन नानाप्रासादगोपुरं॥ मणि
स्तंभसहस्राढ्यं मुक्ताजालपरिष्कृतं। दीर्घिकाभिस्तडागैश्च हृद्यैः पद्मैर्मनोहरैः॥ ८६
जलजैः स्थलजैः पुष्पैर्विविधैश्च विहंगमैः। नानारत्नप्रभोद्योतं नानासिद्धनिषे
वितं॥ देवप्रतिसमस्तानि तत्र देवं पिनाकिनं। स्तुपतेवरदं शंभुं ब्रह्मादिभिरनीः
श्वरं॥ तत्र वाराणसी चैव निम्नगे सिद्धसेविते। बहुजलसमाकीर्णा नानाविहग

नादिता॥ जलपूर्णसरिता देवी सा नदी तत्र जाह्नवी। यान्यासीमे [illegible] ऋजन्तूनां यास्वर्गसरि
तांवरणां॥ या माता सर्वलोकस्य सा गंगा निम्नगा स्थिता॥ अविमुक्तपुरं तत्र पत्यर्द्धं स
र्वदेहिनां॥ प्राप्ते कलियुगे पापे त्वं तद्धानं व्रजत्यसौ। तत्र दृष्टेन देवेन भुणुदन्ती हियत्परं
॥ ॥देवदेव उवाच॥ यस्मरिष्यंति च स्थानं अविमुक्तं सदा नराः। निर्द्धौत सर्वपापास्ते
न विषयन्ति गणोपमाः॥ आगमिष्यन्ति येद्दूरं योजने योजने नराः। ते ब्रह्महत्यामोक्ष्यंति
न विषयंति च मत्युमाः॥ विदित्वा तं पुरं लोके येस्मिन्वत्स्यन्ति मत्पुर॥ अन्तःकाले प्रदा
स्यामि तेषां ज्ञानं विमोक्षदं॥ मोक्षं सुदुर्लभं मत्वा संसारगति भीषणं॥ अस्मनाच र

णोद्दत्वावाराणस्यांवसेन्नरः।सर्वावस्थापियोमर्त्योवाराणस्यांवसेत्सदा॥सयांगति
मवाप्नोतियद्वेद्दनिनैसागतिः॥दुर्लभासागतिश्चापिमन्यानांमुनिसत्तमः॥एषातेव
र्णितासर्वावाराणस्यांमहाकथा॥ सानंत्सुवनंदेशमेवच॥वीरकेमानुष
वनेविहारादटतोविभोः॥वाराणस्यांविशोकोत्रयतोवेकत्रशूलिनः॥आख्यातंय २७
यतोमर्त्योयइमंश्रावयेत्सुधिः॥पठेद्वावाचयेद्वापिमुच्यतेसर्वकिल्बिषैः॥वांछितं
वाप्नुयात्सर्वंमनुजःसर्वसंपदाः॥ ॥इतिनन्दिपुराणेवाराणसीमाहात्म्य॥ ॥
अथयज्ञुः॥वाराणस्यास्तुमाहात्म्यंश्रोतुमिच्छामिपुण्यकृत्।यत्रवैदेवदेवस्यसान्नि

ध्यंशूलिनः।ससदाक्रीडतेयत्रशंभुश्चपार्वत्यासहसंगतः॥गणैःपरिवृतोदेवो
रुद्रैश्चापितथैवच।तस्मिंस्थानेसदादेवोरमतेभुवनेश्वरः॥आश्चर्यंतत्रयद्वृत्तं दृ
ष्टंवायदिवाश्रुतं।तत्सर्वंकथयास्माकंयेनप्राप्नोतिसद्गतिं॥ ॥सूतउवाच॥क
थयामिपरंगुह्यंरहस्यंयोगसुत्तमं।यत्रश्रुतंमयाविप्राकृष्णद्वैपायनात्पुरा॥मः
षीणांसंनिधौप्रोक्तावायुनाजगदायुषो।तत्परंसंप्रवक्ष्यामिनमस्कृत्वास्वयंभुवं
॥सनत्कुमारोभगवान्गंगाद्वारमुपागतः।पृच्छन्तिऋषयस्तस्यसंशयाविष्टचेत
सः॥कमेकंपरमंदेवंकिमेकंपरमंतपः।किमेकंपरमंयज्ञंकिमेकंदैवतंपरं ॥